॥ श्रीविधिमानसहंसा स्तोत्रम् ॥

श्रीमत्परमहंसेत्यादि समस्तबिरुदालङ्कृत श्रीजगद्गुरु सार्वभौम शृङ्गगिरि श्री श्री सच्चिदानन्द शिवाभिनव नृसिंहभारती महास्वामिभिः अनुगृहीतम् ॥

पापिषु प्रथमतो गणनीयम्
पुण्यवज्जनसुदूरगतं माम् ।
नागराजमिव पङ्कजचक्षुः
वाणि पाहि विधिमानसहंसे ॥१ ॥

मांसरक्तमलपूर्णशरीरे
पूतिगन्धनिलयेऽस्थिरवर्ये ।
आत्मबुद्धिमचलां दधतं माम्
वाणि पाहि विधिमानसहंसे ॥२ ॥

मोहलोभमुखरोगविशीर्णम्
जन्ममृत्युभयतप्तहृदब्जम् ।
शान्तिदान्तिमुखमातृविहीनम्
वाणि पाहि विधिमानसहंसे ॥३ ॥

वेदशीर्षपरिशीलनशून्यम्

पादपद्मनमनेऽप्यलसं ते ।

पाणिपङ्कजलसच्छुकबाले

वाणि पाहि विधिमानसहंसे ॥४ ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]